# श्रीमद्भगवद्गीतायां शैक्षिकतत्त्वानि

हीरापाण्डेयः

लेखोऽयं श्रीमद्भगवद्गीताविषये लोकमान्यतिलकमदनमोहनमालवीयगान्धिमहोदयानां संक्षिप्तमन्तव्यम् समुपस्थितं करोति। अत्र श्रीमद्भगवद्गीतायाऽऽलोके शैक्षिकतत्त्वानां यथा बालकाय शिक्षायाः प्रमुखेद्देश्यम्, गौणोद्देश्यं, पाठ्यक्रमभेदाः, शिक्षणविधयः, गुरुशिष्यसम्बन्ध इत्यादिनाञ्चोल्लेखं कृतं वर्तते। श्रीमद्भगवद्गीताया अनुशीलनेन ज्ञायते यत् शिक्षायाः परमोद्देश्यमखिलप्राणिषु स्थित परमात्मन अनुभूतिः करणमेव अस्ति। अस्मिन् मुक्तात्मनः लक्षणानामपि स्पष्टोल्लेखं कृतं वर्तते। शिक्षायाः वैयक्तिकसामाजिकोद्देश्यानां समन्वयं कथं भवेत् इत्यस्यापि स्पष्टं संकेतं प्रदाय समाजे समायोजनार्थं निष्कामकर्मयोगस्य प्रेरणा प्रदत्ता।

श्रीमद्भागवद्गीता महाभारतस्य एक अंशो वर्तते। यस्मिन् जगद्गुरुश्रीकृष्णेन शिष्यस्य प्रतीकरूपाय अर्जुनाय शिक्षा प्रदत्ता। शैक्षिकदृष्ट्या भगवद्गीता अमूल्य निधि वर्तते यतोहि तस्यां सर्वविधप्रचलितानां दार्शनिकानां मान्यतानां सिद्धान्तानां च समाहारः प्राप्तो भवति। प्राचीनभारतीय शिक्षायाः सारः यदि कश्चित् जनः दृष्टुम् इच्छति चेत् भगवद्गीतायामेव प्राप्यते।[1]

**लोकमान्यतिलकमहोदयानुसारम्-** भगवद्गीता अत्यन्ततेजस्वी अमूल्यरत्नं वर्तते यत् दुःखी जीवनाय शान्तिः प्रददाति।

**महामान्य मदनमोहनमालवीयानुसारम्-** गीतायां ज्ञान-भक्ति-कर्म, इत्येषाम् विचित्र समन्वयो अस्ति।

**महात्मागाँधी महोदयानुसारम्-** अनेन भगवद्गीता जगन्माता इति उक्तम्। यस्य द्वारं उद्घाटियतुं यः प्रयत्नं करोति, तस्य कृते सदैव उद्घाटितं भवति।

गीता तत्त्वविज्ञानस्य धर्मस्य नीतिशास्त्रस्य च व्याख्यां करोति।[2]

**भगवद्गीतानुसारम् शिक्षायाः परिभाषा -**

ज्ञानस्य व्याख्यामेव शिक्षायाः परिभाषा निहिता भवति अतः - शिक्षा सा भवति या प्रत्येकव्यक्तौ निहितब्रह्मणः अथवा परमात्मनः अनुभूतिं कारयितुम् अर्हति।

यस्य ज्ञानचक्षुः अस्ति सः एव अस्यान्तरात्मनः दर्शनं कर्तुं शक्नोति, मोहान्धप्राणी न।

सर्वेषु प्राणिषु विद्यमानपरमात्मनः दर्शनं विनाज्ञानं न सम्भवति।[3]

**शिक्षायाः उद्देश्यानि -**

भगवद्गीतानुसारं शिक्षायाः लक्ष्यं मनुष्यं तस्मात् अज्ञानात् मुक्तकरणमस्ति यत् भेदोत्पादकमस्ति, आत्मानुभूतौ च बाधकं भवति। अतः शिक्षायाः उद्देश्यं मानवं तस्मिन् प्रकाशे आनयनमस्ति यः भेदे अभेदस्य दर्शनम् कारयति, यः सर्वप्राणिषु संस्थितपरमात्मनः अनुभूतिं कारयति।

अन्यभारतीयदर्शनसदृशं गीताया आग्रहोऽपि मानवाय आध्यात्मिक मुक्तिप्रदानमस्ति येन समग्रव्यक्तित्वस्य रूपान्तरणं च जायते, यस्य फलस्वरूपं मानवीयप्रकृतिः, दैवीप्रकृतिः जायते, नैतिकाचरणं सहजं जायते, ईश्वरस्यसाकं समरूपता च जायते। मुक्तात्मा ईश्वरीयज्ञानात् अभिप्रेतो भवति दैवी-संकल्पेन च कार्यं करोति।[4] यतोहि श्रीकृष्णः कथयति- मतः परतरं[5] ......... सर्वं ईश्वरात् एव ओतप्रोतमस्ति अतः यः तं

ईश्वरं जानाति तर्हि जागर्ति, सर्वत्र तस्य शक्तिमनुभवति, जगति वसन् अपि भागेषु लिप्तो न भवति।[6] मुक्तात्मा यः भवति सः जानाति यत् जगति असतः तु सत्ता एव न अस्ति, सतः च अभावो न वर्तते।[7]

मुक्तिप्राप्तये मानवजीवनस्य तननकष्टादिदुःखानि नष्टव्यानि न वर्तन्ते अपितु तेषां रूपान्तरणस्य आवश्यकता वर्तते। यः मानवः मुक्तः भवति सः स्वेन्द्रियाणि नष्टानि न करोति अपितु तेषां शुद्धिं करोति, येन माध्यमेन परमेश्वरस्य प्राप्तिर्भवति।

भगवद्गीतायाम् शिक्षायाः वैयक्तिक सामाजिक-उद्देश्याणां शोभनं वर्णनमस्ति। यदा युद्धक्षेत्रे अर्जुनः 'मया किं कर्तव्यम्' इति चिन्तयति, तदा श्रीकृष्णस्योपदेशं श्रुत्वाः[8] सः वैयक्तिक-सामाजिकादर्शयोः मध्ये समन्वयं करोति।

अनेन प्रकारेण शिक्षायाः उद्देश्यं बालकाय न केवलं सामाजिकदायित्वानाम् निर्वाहशिक्षणमपितुं अन्तर्निहित ध्वनिं श्रुत्वा, अवगम्य तदनुसारम् अनुसरणस्य योग्यताप्रदानमपि अस्ति।[9]

एतदतिरिच्य इतोप्यधः उद्देश्यानि सन्ति-

सदगुणानाम् विकासकरणम्।[10]

आध्यात्मिक ज्ञानस्य विकासकरणम्।

आध्यात्मिक योगस्य अनुभूतिः।।[11]

आत्मपूर्णतायाः प्राप्ति।[12]

अमरतायाः प्राप्ति।

परोपकार-सेवया च सामाजिकगुणानां विकासकरणम्।

मुक्तिशुद्धिः च प्राप्तकरणम्

निष्कामकर्मणः प्रेरणाप्रदानम्।[13]

एतदा गीतायां पाठ्यक्रमोऽपि परापरेति भागद्वये विभज्यते। पराविद्यासम्बन्धी आध्यात्मिकः, अपराविद्याम्बन्धी भौतिकः भवति।

अत्रैव शिक्षणविधीनां विषये वर्णनं प्राप्यते। मनुष्याः त्रिप्रकारकाः भवन्ति- सात्त्विकाः, राजसाः तामसाश्च अतः तेषामनुरूपं शिक्षणविधयोऽपि त्रिप्रकारकाः स्युः ज्ञानात्मक- भावनात्मक-कर्मप्रधानाश्च। यस्य विद्यार्थिनः प्रवृत्ति तथ्यानां संकलने विश्लेषणे च भवति तेभ्यः ज्ञानात्मकविधिः सर्वोपयोगी श्रवण-मनन-निदिध्यासनादयः ज्ञानात्मकविधेः उदाहरणानि सन्ति। तथैव भावनात्मकछात्राणां कृते साहित्यिकविधयः यथा कथोपकथन- अभिनय- व्याख्यानादयः महदुपकुर्वन्ति।[14]

तामसप्रवृत्तिवताम् छात्राणां कृते तु कृत्वाधिगमः सिद्धान्ताधरेण क्रियाप्र□□नाः विधयः उपयुज्यनते[15] परियोजनाविधि, क्रीडाविधिः इत्यादयः विधयः एतस्य उदाहरणानि सन्ति।

गीतायां सर्वोत्कृष्टवर्णनं गुरुशिष्यसम्बन्धस्य प्राप्यते। ज्ञानप्राप्तेः साधनं शरणापनावस्था अस्ति यया ज्ञानं चिरं तिष्ठति।[16] गुरुशिष्ययोः सम्बन्धः भगवद्गीताया श्लोकैः ज्ञातुम् शक्यते-

यच्छ्रेय स्थान्निश्चितं ब्रूहि तन्मे।

शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।[17]

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज,

अहं त्वा स्वपापेभ्यो मोक्षियिष्यामि मा शुचः।।[18]

शैक्षिकदृष्ट्या गीता मानवं तस्य समाजे समायोजनाय तथा जीवनशैलीप्रदानाय एकाम् अद्भुतशक्तिं प्रददाति। अद्य समाजः अनुक्षणं परिवर्तते अतः समाजे समायोजनं शिक्षायाः उद्देश्यं भवति। एतस्य कृते गीतायां संसारे निष्कामकर्मयोगस्य उपदेशः प्रशंसनीयः। बालकः शिक्षाक्षेत्रे फलेच्छा विना निर्दुष्टं कर्म कुर्यात्। इत्यस्य उपदेशः अत्र प्राप्यते-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।[19]

1. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

2. शर्मा डॉ. आर. ए., शिक्षा के दार्शनिक एवं सामाजिक मूल आधार, आर. लाल बुक डिपो, मेरठ

3. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर विमूढा नानुपश्यन्ति, पश्यन्ति ज्ञान चक्षुः, अध्याय 15, श्लोक 10

4. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

5. भगवद् गीता 7/7

6.प्रजाप्रसादमारुह्य अशोच्यः शोचतो जनान्। भूमिष्ठानिवशैलस्थः सर्वान्प्राज्ञोऽनुपश्यति योगदर्शन व्यासभाष्य 1/47

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणयश्यति। भगवद्गीता अध्याय-6/30,

"'सर्वभूतस्थित यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोऽपि स योगी मयि वर्तते। भगवद्गीता 6/31

7. नासतो विद्यते भावो ना भावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः। गीता 2/16

8. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, भगवद्गीता 2/32/37

9. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

10. अभय सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्। गीता 16/1

अहिंसा सत्यमक्रोधस्त्यागः शान्तिपैशुनम्। दयाभूतेष्वलोलुप्त्वं मार्दवं हीरचापलम्।। 16/2

तेजः क्षमा धृतिः शौचमद्रोहोनातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत।। 16/3

11. मम योनिर्महद्ब्रह्म तस्मिन्नार्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत।। 14/3

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता।। 14/4

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।। 14/5

12. यतः प्रवृत्तिभूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।। 18/46

13. त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः। 4/20

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैकर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति।। 18/49

14. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिरगच्छति।। 18/49

15. ओड डॉ. लक्ष्मीलाल के., शिक्षा की दार्शनिक पृष्ठभूमि, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर

प्रवृत्ति च निवृत्तिं च कार्यं चाकार्यमेव च। अयभावत्प्रजानाति बुद्धिः सा पार्थ राजसी।।18/31

अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थन्विपरीताश्च बुद्धिः स पार्थ तामसी।।18/32

16. बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृतो तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।। 2/50

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः। 4/34

17. भगवद्गीता- 2/65

18. भगवद्गीता- 2/66

19. भगवद्गीता- 2/47